International Journal of Sanskrit Research 2017; 3(3): 423-426

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 423-426
© 2017 IJSR
www.anantaajournal.com
Received: 18-03-2017
Accepted: 28-04-2017

ड: सुबल चंद्र साहु
Lecturer in Vyakarana, Govt. Degree Sanskrit College, Baripada, Odisha, India

Corresponding Author:
ड: सुबल चंद्र साहु
Lecturer in Vyakarana, Govt. Degree Sanskrit College, Baripada, Odisha, India

# समासस्य वृत्तित्वम्

ड: सुबल चंद्र साहु

## (The Explicatory Essence of Compounds)

अत्र कारकाश्रितसमाससंज्ञाया अपरिहार्यत्वमवधातव्यम्। तथाहि समस्यतेऽनेकपदं येन स समास:, यस्य निर्वचनं नीचै: समुपवृंहितम्।

१. समसनं समास:- Conjoining of words into one.
२. संक्षिप्तीकरणं समास:- Concising words for disclosing the meaning.
३. समस्यते अनेकं पदं येन स समास:- Compound is formed by comprising words.
४- एकपदी भवनं समास:- Compound consists in uniting words.
५- पदानामेकीकरणं समास:- Oneness of the elements of compounds.
६- यस्मिन् समुदाये पदद्वयं परस्परं समस्यते स समास:- Composition of compound Joining two or more words.
७- पृथगर्थानां पदानामेकार्थीकरणं समास:- Integration of meaning through distingui-Shing words.

समाससमावेशस्योपोद्घातत्वेन ”समर्थ: पदविधि:ह्ल इति सूत्रस्योपपादनं विहितम्।

**समर्थ: पदविधि**:[२]

पदसंवन्धी यो विधि: स समर्थाश्रित: वोध्य:। सूत्रमिदंपरिभाषा सूत्रमिति समान्मातम्। तथाहि महाभाष्ये[३] ”परिभाषा पुनरेकदेशस्था सती शास्त्रमभिज्वलयति पदीपवत्, यथा-वेश्म प्रदीप:ह्ल नागेशेन उद्योतव्याख्याने प्रकटितम्-

एकदेशस्थिताशास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते।।[४]
यदि सूत्रमिदमधिकारं स्यात्, पदविधिग्रहणमनर्थकं स्यात्। [५]

**समर्थत्वं च–पृथगर्थानां पदानामेकार्थोपस्थितिजनकत्वम्।**[६]

**समर्थ:**

| **संगतार्थ: समर्थ:** | **ससृष्टार्थ: समर्थ:** | **संप्रेक्षितार्थ:समर्थ:** | **संवन्धार्थ:समर्थ:** |
|---|---|---|---|
| Justification of Meaning | Constitutive part of Morphology | Attribution of relation | Interlinked meaning |

येन सह यस्य सम्वन्धो तेन सह स समर्थो भवति यथा-राजपुरुषः[७] । तत्र समर्थस्य भावः सामर्थ्यम्। सामर्थ्यं हि द्विधा विभज्यते। (१) व्यपेक्षालक्षणसामर्थ्यम् (२) एकार्थीभावलक्षण सामर्थ्यम् । पदस्य विधिः, पदयोः विधिः, पदानां विधिरिति षष्ठी समासः[८] । सर्वः पदविधिः समर्थः भवितव्यः[९]। यथा समासादिपदविधिः विग्रहवाक्यार्थाभिधाने यः शक्तः सः समर्थः।

**समर्थः पदविधिः**

**समर्थस्य भावः सामर्थ्यम्**
Meaning or significance
Projected by words.

**(पदानां विधिः) विधिः(कार्यम्)**
Etymological arrangements

**सामर्थ्यम्**

**व्यपेक्षालक्षणम्**
(Dependent constituent part)

स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् यः परस्परान्वयः तत् व्यपेक्षाभिधं सामर्थ्यम् । विशिष्टा अपेक्षा व्यपेक्षा। परस्परव्यपेक्षासामर्थ्यमेके [१०] भाष्यम्-परस्परव्यपेक्षासामर्थ्यमेके इच्छान्ति का पुनः शव्दयोः व्यपेक्षा ? न व्रूमः शव्दयो रिति, किं तर्हि ? अर्थयोः इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते, पुरुषोऽपि राजानमपेक्षते, तयोरभि-संवन्धस्य षष्ठी वाचिका भवति। तद् यथा- कष्टंश्रित इति[११]। प्रदीपः परस्पराकांक्षारुपा व्यपेक्षा[१२]। आकांक्षा-प्रतीतिपर्यवसानविरहः[१३]। योग्यता- पदार्थानां परस्परसम्वन्धे वाधाभावः[१४]। आसत्तिः- वध्यविच्छेदः[१५]

**एकार्थीभावलक्षणम्**
(Indicative of particular meaning)

प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग्गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादन रुपम् एकार्थीभावलक्षणसामर्थ्यम्। भाष्यवार्त्तिकम्-संघातस्यैकार्थ्यान्निवयव संख्यातः सुवुत्पतिः ।[१६] भाष्यम्-संघातस्य एकत्वमर्थः, तेन अवयव संख्यात सुवुत्पत्तिः न भविष्यति। प्रदीपः- राजपुरुशब्दात् संघातात् विभक्तिः सघातेन एकत्व संख्यायुक्तो विशिष्टोऽर्थ प्रतिपाद्यते इति तदाश्रयमेकवचनं प्रवर्त्तते ।[१७] उद्योते- संघातस्तैकार्थत्वेऽपि धवखदिरादिसंघातवद् द्विर्वचनं स्यात्। अतः संघाते अवयार्थेपकृत संख्यायुक्त विशिष्टार्थाश्रितमेकवचनम्[१८] प्रदीपः- यत्र पदानि उपसर्जनीभूतस्वार्थानि निवृत्त स्वार्थानिवाप्रधानार्थापादानाद्यर्थानि अर्थान्तराभिधायीनि वा स एकार्थीभावः[१९]। समासरुपपदविधौ एकार्थीभावनिष्पन्नाय पूर्वपदस्य विभक्तिलोपे मूलशव्दमात्रं तिष्ठति, तथाहि मेस्कमूलेर महोदयेनापि स्ववाख्याने निगदितम् [२०]।

**विधिः(कार्यम्)**

**भावसाधनः**
(Conveying the Genitive case through accusative idea.)

पदानां विधीयमानत्वात् कर्मणि षष्ठी।
भावार्थे - विधानं विधिः।
विध- विधाने अत्र औणादिक
इन् प्रत्येये विधिः।

**कर्मसाधनः**
(Manifesting Genitive case as sesh sasthi.)

कर्मसाधने शेष षष्ठी ।
कर्मार्थे - विधीयते इति विधिः। वि-धा
धातोः "उपसर्गे घोःकिः[२१] सूत्रेण कि प्रत्यये,
"आतो लोप इटि चह्ण [२२] सूत्रेण आ लोपे विधिः।
भाष्यम्- विपूर्वात् द्धाञः कर्म साधन इकारः[२३]

प्रदीप:-विध विधाने इत्यस्यौणादिकेन्प्रत्यायान्तस्य निवृत्यर्थं विपूर्वात् धाञ इत्युक्तम् [२४]।

**वृत्तिः (Derivation)**

तत्र भट्टोजिदीक्षितेन उच्यते-विग्रहवाक्यावयवपदार्थेभ्यः परोऽन्यः योऽयं विशिष्टैकार्थः तत् प्रतिपादिका वृत्तिः।[२६] महाभाष्ये तु निम्नरीत्या पर्यालोचना समुपपादिता। यथा-

भाष्यम् - परार्थाभिधानं वृत्तिरित्याहुः।[२७]
प्रदीप - परस्य शब्दस्य योऽर्थः तस्याभिधानं शब्दन्तरेण यत्र सा वृत्तिः।
उद्योते - समासादौ वृत्तिव्यवहारस्तु वृत्तिवृत्तिमतारभेदोपचारात् वोध्यः। एकार्थीभावरुपावृत्तिः लोकत एव सिद्धा। वृत्ति- वृत्याश्रयसमासादिरुपाम्
भाष्यम् - अथ ये वृत्तिं वर्त्तयन्ति।
उद्योते - एकार्थीभावरुपां वृत्तिं ये वर्त्तयन्ति, शास्त्रेण निष्पादयन्ति ये शास्त्रैकगम्यं सामर्थ्यं मन्यन्ते। अयं भावः- एकार्थीभावकृत विशेषाः समर्थसूत्रविधेयाः । समर्थं च समासंज्ञकमित्यर्थः।[२९]
भूषणसारे - समास इति वृत्तिमात्रोपलक्षणम् ।[३०] अत्रायं निकेषः यत् - समासपदं कृत्तद्धितसमासैकशेषसनाद्यन्तानां पञ्चानामपि वृतिनामुपलक्षणं समर्थपदविधिकारात् ।

शास्त्रप्रवृत्तिनिमित्तं वर्णानामुपदेशः, तथाहि भाष्ये वृत्तिः समवायार्थ उपदेशः। तत्र सन्दर्भावसरे सुरेन्द्रनाथदासगुप्तमहोदयेन व्याकरणविज्ञानस्य उपक्रमाय वृत्तिरियमावश्यकी इति प्रोक्तम्।[३१] तत्र काशिकायां- समर्थः शक्तः, विग्रहवाक्यार्थाभिधाने यः शक्तः सः समर्थो वेदितव्यः[३२]। न्यासकारेण व्याख्यातम्- समर्थः शक्त इति स्वकार्यनिर्वर्त्तनक्षमः, स हि लोके समर्थ इत्युच्यते। स्वार्थप्रतिपादनमेव शब्दानां स्वकार्यम्[३३]। काशिकायां समर्थपदस्य तात्पर्यप्रतिपादनं वक्ष्यमाणरीत्या विहितं यथा- समर्थानां पदानां सम्वद्धार्थानां- संसृष्टार्थानां विधिर्वेदितव्यः। यथा- द्वितीया श्रीतातीत......[३४] कष्टं श्रितः कष्टश्रीतः। समर्थग्रहणं किम्? पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रो गरुकूलम्। तृतीया तत् कृतार्थेन गुणवचनेन.....[३५] शङ्कुलया खण्डः शङ्कुलाखण्डः। समर्थग्रहणं किम् ? किं त्वं करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन। चतुर्थी तदर्थार्थवलिहितसुखरक्षितैः[३६] यूपाय दारु यूपदारु। समर्थग्रहणं किम्? गच्छ त्वं यूपाय ,दारु देवदत्तस्य गेहे । पञ्चमी भयेन[३७] वृकेभ्यः भयं वृकभयम्। समर्थग्रहणं किम्? गच्छ त्वां मा वृकेभ्यः, भयं देवदत्तस्य यज्ञदत्तात्। षष्ठी[३८] राज्ञः पुरुषः राजपुरुषः। समर्थ ग्रहणं किम्? भार्या राज्ञः, पुरुषो देवदत्तस्य। सप्तमी शौण्डै[३९] अक्षेषु शौण्ढः अक्षशौण्ढः। समर्थग्रहणं किम्? शक्तस्त्वमक्षेषु। शौण्ढः पिवति पानागारे, पदग्रहणं किम्? वर्णविधौ सामर्थपरिभाषा मा भूत्, तिष्ठतुदध्यशान त्वं

**The analysis of five Vruttis)**

| वृत्तिभेदः (Classification of Vrutti) | स्वरुपम् (Essential nature) | विग्रहः (Explanning the words of compound) | उहाहरणम् (Examples) |
|---|---|---|---|
| १. कृद्वृत्तिः | पदसम्वन्धीकृदन्तविधिः | वक्ति(कथयति) | वाचकः |
| २. तद्धितवृत्तिः | पदसम्वन्धीतद्धितान्तविधिः | दक्ष्यस्य अपत्यम् | दाक्षिः |
| ३. समासवृत्तिः | पदसम्वन्धीसमासविधिः | नद्याःजलम् | नदीजलम् |
| ४. एकशेषवृत्तिः | पदसम्वन्धी एकशेषविधिः | रामश्च लक्ष्मणश्च | रामलक्ष्मणौ |
| ५. सनाद्यन्तवृत्तिः | पदसम्वन्धीसनाद्यन्तविधिः - | (सन्, यङ्, काम्यच् प्रभृतयः) | |

यथा- क. सनन्तधातुवृत्तिः- पठितुमिच्छति -पिपठिषति
ख. यङ्न्तवृत्तिः - पुनःपुनःगच्छति - जंगम्यते
ग. नामधातुवृत्तिः- आत्मानं पण्डितं मन्यते - पण्डितायते।

एतस्याः वृत्तेः जहत्स्वार्था-अजहत्स्वार्थारुपेण द्वैविध्यं निम्नोक्तरीत्या शाब्दिकानां सिद्धान्तपुरस्सरं प्रतिपाद्यते।

**वृत्तिः**
**(Revealation of desired meaning)**

| जहत्स्वार्था (जहत्स्वः) | अजहत्स्वार्थ (अजहत्स्वः) |
|---|---|
| Cessation of meaning of words in compound | Implication of meaning of words |

| जहति पदानि स्वार्थं यस्यां वृत्तौ सा जहत्स्वार्था वृत्तिः । | न जहति पदानि स्वार्थं यस्यां वृत्तौ सा- अजहत्स्वार्था वृत्तिः । |
|---|---|

**भाष्ये**[४१]- वृत्तौ समर्थाधिकारः, सामर्थ्यं नाम- भेदः संसर्गो वा, राजपुरुषमानय- अत्र राजा पुरुषं निवर्त्तयति अन्येभ्यः स्वामीभ्यः, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः निवर्त्तयति। कौण्डभट्टेन भाषितम्- जहत्स्वार्थाजहत्स्वार्थे द्वेवृत्ती ते पुनस्त्रिधा- भेदः, संसर्ग उभयं वेति वाच्यव्यवस्थितेः।[४२] जहत्स्यार्था -अजहत्स्वार्था इति वृत्तिद्वयं विद्यते। तत्र च भेदः-संसर्ग-उभय-इति त्रयाणां गहणम्। अत्र इदमेव तात्पर्यं यत् - पदे वर्णवत् वृत्तौ पदानामानर्थक्यं वोध्यम्। तथाहि समासशक्त्या एव राजपुरुष इत्यादि एकार्थीभावेन वोधः संगच्छते। अजहत्स्वार्थवृत्तौ अवयवार्थमादाय आकांक्षादिद्वारा विशिष्टार्थवोधः[४३]। नागेशभट्टेन उच्यते- जहत्स्वार्था तु तत्रैव यत्र रुढिविरोधिनी। अर्थात् पंकजपदात अवयवार्थसंवलितसमुदायार्थे पद्मे शक्ति स्वीकारे रुढिविरोधी योगरूढस्य ग्रहणात् जहत्स्वार्था

भवति [४४] । अतएव शब्दः चतुर्विधः यथाः-
१. रुढः- अवयवार्थमनपेक्ष्य समुदाये शक्तिः- रथन्तरम्-सामवेदविशेषः
२. योगरुढः-अवयवार्थसंवलितसमुदायार्थे शक्तिः- पंकजम्।
३. यौगिकः- अवयवशक्त्या एवार्थवोधकत्वम् - पाचिका, पाठिका।
४. यौगिकरुढः- अवयवशक्त्या समुदायशक्त्या चार्थवोधकत्वम्
मण्डपः- (१) मण्डपानकर्त्ता (२) गृहम् ।

अत्र नागेशेन उच्यते-सामासे एकार्थीभावे स्वीकृते अवयवानां निरर्थकत्वे समुदायशक्त्या ऋद्धस्य राज्ञःपुरुष इत्यादि विशेवणान्वयासम्भवात् सिद्धान्ते समासे शक्तिरङ्गीकर्त्तव्या[५३]। वैयाकरणधिया एकार्थीभावसामर्थ्यनिवन्धनवृत्तिमुपजीव्य परिनिष्ठितपदोपादानवैशद्याय समासवृत्तिः शब्दशास्त्रे स्ववैभवं प्रकामं प्रतनुतेतराम्। इति शम्।

**सन्दर्भविवृत्तिः**


१. वाक्यपदीयम्- १-११
२. पा.सू.२-१-१
३. म.भा.-२-१-१
४. म.भा. समर्थपदविधि उद्योत .
५. कशिकान्यास -२-१-१
६. सि.कौ.वालमनोरमा - "समर्थपदविधि.ह्ल
७. सि.कौ.वालमनोरमा - "समर्थपदविधि. ह्ल
८. सि.कौ. वालामनोरमा
९. काशिका
१०. भाष्यवार्त्तिकम्
११. म.भा. २-१-१
१२. म.प्र २-१-२
१३. साहित्यदर्पण, परिच्छेद-२, कारिका-१
१४. तत्रैव
१५. तत्रैव
१६. म.भा.२-१-१.
१७. म.भा. प्रदीपः२-१-१.
१८. म.भा. उद्योतः २-१-१.१९.म.भ. प्रदीप २-१-१
२०. As a general Rule, all words which form a compound drop their inflectional terminations except the last, they appear in that form which is called their base and when they have more than one in their pada base. Hence देवदास a servant of God राजपुरुषः A kings man. (A Sanskrit Grammer, Page-325, By P. Maxmullar)
२१. पा.सू(३-३-९२)
२२. पा.सू ६-४-६४
२३. म.भा २-१-१
२४. म.भा. प्रदीप २-१-१
२५. म.भा. २-१-१
२६. सि.कौ. सर्वसमासशेष प्रकरणम् –बालमनोरमा
२७. म.भा. उद्योत २-१-१
२८. म.भा २.१.१
२९. म.भा उद्योत २-१-१
३०. वै भुषणसार – समासशक्तिनिर्णयः
३१. It is for introducing the Sastras the syllables are instructed in order वृत्तिसमवायार्थ….. What is the meaning of the word. Their Utterence in order is for the shake of the introduction of the Grammatical science. (Mahabhasya-I. Ahnika. By Surendranath Dasgupta)
३२. काशिका २-१-१
३३. काशिका
३४. पा.सू. २-१-२४
३५. पा.सू. २-१-३०
३६. पा.सू.- २-१-३६
३७. पा.सू- २-१-३७
३८. पा.सू.२-२-३
३९. पा.सू -२.१.४०
४०. इकोयणचि-३-१-७७
४१. म.भा२-१-१
४२. वै.भु.का-३०
४३. वै.भु.सा-समासशक्ति-निरुपणम् ४४.प.ल. मंजुषा-समासवृत्यर्थनिरुपणम् ।